सुश्रुतेनोक्तः यथा "हंसवारेत्याद्युपक्रमे काचाख्यमल्लिकाख्येत्यादीनुक्त्वा "स्रवाः संवचारिणश्च"।

**काचिघ** पु० कच–दीप्तौ वा० इण् काचिं कान्तिं हन्ति गच्छति हन–गतौ वा० ड पृषो० हस्य घः। १काञ्चने। २क्षेमखण्डे (क्षेमडा) ३स्तवके च मेदि०। [रोपिते अमरः।

**काचित** त्रि० कच–बन्धने णिच् कर्मणि क्त। शिक्या-

**काचित्** अव्य० का+चित् सुप्सु० पार्थिन्यादिमते द्विपदम्। अवाकल्यान्विते कापीत्यर्थे। "गोपोभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी" पदाङ्कदूतम्। चयनं चित् चि-संप० क्विप्–ईषत् चित् कोः कादेशः। ईषच्चयने। "प्रियं काचित्करं हविः" ऋ०१०८६,१२। "काचित्करम् ईषच्चयनकरम्"। [भक्षकद्रव्ये त्रिका०।

**काचिम** पु० कच–बन्धे णिच्–इमन्। देवकुलोद्भवे

**काचूक** पुंस्त्री कच–दीप्तौ बा० ऊकञ्। १कृकवाकौ ताम्रचूडे पीतमस्तके खगे २कोके चक्रवाके च मेदि० स्त्रियां जातित्वात् ङीष्।

**काजल** न० कुत्सितं जलम् कोः कादेशः। कुत्सितजले मुग्ध०

**काञ्चन** न० काचि–दीप्तौ भावे ल्युट्। १दीप्तौ। काचि–दीप्तौ ल्यु। २स्वर्णे अमरः। "अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम्" "धार्य्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषाम्" "गोवीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः" मनुः। ३पद्मकेशरे मेदि०। ४नागकेशरपुष्पे ५धने राजनि०। ६चम्पके ७नागकेशरवृक्षे ८उदुम्बरे ९धुस्तूरे १०स्वनामख्याते वृक्षे च पु० मेदि०। स्वार्थे कन्। काञ्चनवृक्षे। काञ्चनवृक्षश्च सुश्रुते वातशमनतयोक्तः। भद्रदारुकुष्ठेत्याद्युपक्रमे "काञ्चनकभार्गीत्यादिना "समासेन वातसंशमनो वर्गः" इति। "काञ्चनारः काञ्चनको गण्डारिः शोणपुष्पकः। कोविदारश्च मरिचः कुद्दालो युग्मपत्रकः। कुण्डली ताम्रपुष्पश्चाश्मन्तकः स्वल्पकोरकः। काञ्चनारो हिमग्राही तुवरः श्लेष्मपित्तनुत्। कृमिकुष्ठगुदभ्रंश गण्डमालाव्रणापहः। कोविदारोऽपि तद्वत् स्यात् तयोः पुष्पं लघु स्मृतम्। रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासनुत्" भावप्र० तत्पर्य्यायभेदगुणाद्युक्तम्। काञ्चनमिव कायति कै–क। हरिताले न० राजनि० शालिभेदे सुश्रु० "लोहितकशालिकलमेत्याद्युपक्रमे" दीर्घशूककाञ्चनकेत्यादि "महादूषकप्रभृतयः शालयः" इत्युक्तम्। काञ्चनस्य विकारः अण्। ११काञ्चनविकारे त्रि०। "न काञ्चने यत्र मुनेरनुज्ञया" माघः। "निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति" मनुः। स्त्रियां ङीप्। "तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिः" मेघ०। किमः द्वितीयान्तात् स्त्रियां चन मुग्ध०। १२काञ्चिदित्यर्थे अव्य०। "न च काञ्चन काञ्चनसद्म चितिम्" भट्टिः। "न काञ्चन परिहरेत्" छा०उ०। द्विपदमिति बहवः। काचि बन्धने भावे ल्युट्। १२बन्धने न०।

**काञ्चनकदली** स्त्री काञ्चनवर्णा कदली। स्वर्णकदल्याम् (चाँपाकला) राजनि०।

**काञ्चनकारिणी** स्त्री काञ्चनं बन्धनं करोति कृ–णिनि ङीप्। शतमूल्यां शब्दच०। तस्या बहुमूलत्वेन बन्धनकारित्वात् तथात्वम्। [चोरिणीलतायाम् राजनि०।

**काञ्चनक्षीरी** स्त्री काञ्चनमिव क्षीरमस्याः गौरा० ङीष्।

**काञ्चनगिरि** पु० काञ्चनमयस्तत्प्रधानो वा गिरिः शाक० त०। १सुमेरुपर्वते हेमच०। २दानार्थकल्पितस्वर्णाचले च। काञ्चनाचलस्वर्णाचलादयोऽप्यत्र।

**काञ्चनपुष्पक** न० काञ्चनमिव पीतं पुष्पमस्य कप्। आढल्यवृक्षे राजनि० आढल्यशब्दे ९०५पृ० दृश्यम्।

**काञ्चनपुष्पी** स्त्री काञ्चनमिव पुष्पमस्य ङीप्। गणिकारी वृक्षे राजनि०।

**काञ्चनप्रभ** पु० ऐलवंश्ये नृपभेदे। ऐलपुत्रवंशोपक्रमे "अमावसोस्तु दायादो भीमोराजाथ लग्नजित्। श्रीमान् भीमस्य दायादो राजासीत् काञ्चनप्रभः" हरिवं०२७अ०।

**काञ्चनाक्ष** पु० दानवभेदे। "काञ्चनाक्षः कपिस्कन्धो व्याघ्राक्षः क्षितिकम्पनः" हरिवं० २४० अ०।

**काञ्चनार** पु० काञ्चनं तद्वर्णमृच्छति पुष्पेण, ऋ–अण् उप० स०। पीतपुष्पे कोविदारे काञ्चनवृक्षभेदे भावप्र०।

**काञ्चनाल** पु० काञ्चनं तद्वर्णमलति अल–अण् उप० स०। पीतपुष्पे कोविदारे काञ्चनवृक्षभेदे शब्दर०।

**काञ्चनी** स्त्री काञ्चते दीप्यतेऽनया काचि–दीप्तौ करणे ल्युट् ङीप्। १हरिद्रायाम् मेदि० २गोरोचनायाम्। काञ्चनं तद्वर्णः क्षीरेऽस्याः ङीष्। ३स्वर्णक्षीरिणीवृक्षे च राजनि०।

**काञ्चनीया** स्त्री काञ्चनाय दीप्तौ हिता छ। १गोरोचनायाम् राजनि० काञ्चनस्येदम् वृद्धत्वात् छ। २काञ्चनसम्बन्धिनि त्रि०। "काञ्चनीयाऽपि माला या न सा दुष्यति कर्हिचित्" भा० अनु० १०४ अ०।

**काञ्चि(ञ्ची)** स्त्री काचि–बन्धने कर्मणि इन्। रशनायाम् (चन्द्रहार गोट) इत्यादौ कटिबन्धदामभेदे। "स्वकरावबन्धनविसृमगलनक्लकाञ्चि काञ्चिदवलम्बवशः" माघः।